गम्भीरं, त्रि, (गच्छति जलमत्र। "गभीर-गम्भीरौ।" उणां। ४। ३५। इति गच्छतेरीरन् भश्चान्तादेशः नुमागमश्च।) गभीरम्। इत्यमरः। १।१०।१५॥ (यथा, गोः रामायणे। ५। १। ५०।
"ततः सागरगम्भीरो वानरः पवनो जवे॥")

गम्भीरः, पुं (गम्+" गभीरगम्भीरौ" उणां। ४।३५। इति ईरन् भश्चान्तादेशः नुमागमश्च।) जम्बीरः। पङ्कजम्। कह्लारः। इत्युणादिकोषः॥ (शिवः। यथा, महाभारते।१३।१७।५२।
"गम्भीरघोषो गम्भीरो गम्भीरबलवाहनः॥"
स्त्रियां, हिक्कारोगभेदः। यथा, सुश्रुते उत्तरतन्त्रे ५० अध्याये।
"नाभिप्रवृत्ता या हिक्का घोरा गम्भीरनादिनी।
शुष्कोष्ठकण्ठजिह्वास्यश्वासपार्श्वरुजाकरी।
अनेकोपद्रवयुता गम्भीरा नाम सा स्मृता॥")

गम्भीरवेदी, [न्] पुं, (गम्भीरं मन्दं यथा स्यात् तथा चिरकालात् इत्यर्थः यद्वा गम्भीरं अङ्कुशवेधनं निषादिदत्तशिक्षामादेशं वा वेत्तीति विद् + णिनि।) दुर्द्धरहस्ती। तत्पर्य्यायः। अङ्कुशदुर्द्धरः २ चालकः ३ व्यालकः ४। इति त्रिकाण्डशेषः॥ अवमताङ्कुशः ५। इति हेमचन्द्रः॥ (यथा, रघौ। ४। ३९।
"स प्रतापं महेन्द्रस्य मूर्द्ध्नि तीक्ष्णं न्यवेशयत्।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः॥"
अस्य लक्षणम्।
"चिरकालेन यो वेत्ति शिक्षां परिचितामपि।
गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः॥"
इति शब्दार्थचिन्तामणिधृतराजपुत्त्रीयवचनम्॥ मतभेदेन लक्षणान्तरमपि दृश्यते।
"त्वग्भेदाच्छोणितस्रावात् मांसस्य क्रथनादपि।
आत्मानं यो न जानाति स स्याद् गम्भीर-वेदिता॥"
इति रघुटीकायां मल्लिनाथः॥)

गम्यं, त्रि, (गम्यते इति। गम्+कर्म्मादौ यत्।) प्राप्यम्। इत्यमरः। ३। २। ४२॥ (यथा, भगवद्गीतायाम्। १३। १७।
"ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्व्वस्य विष्ठितम्॥")
गमनयोग्यञ्च॥ (यथा, महाभारते।३।८५।१०२।
"गम्यान्यपि च तीर्थानि कीर्त्तितान्यगमानि च॥"
स्त्रियां, सम्भोगार्हा स्त्री। यथा, महाभारते। १। ८३। ३५।
"अभिकामां स्त्रियं यस्तु गम्यां रहसि याचितः॥")

गम्यमानः, त्रि, (गम्यते इति। गम्+कर्म्मणि शानच्।) वर्त्तमानगमनाश्रयग्रामादिः॥

गयः, पुं, (गीयते वीर्य्यादिप्रभावेनासौ। गै+घञ्। पृषोदरात् ह्रस्वत्वे साधुः।) वानरभेदः। (यथा, गोः रामायणे।४।२५।३३।
"गयो गवाक्षो गवयः शरभो गन्धमादनः॥")
स तु वैवस्वतपुत्त्रः। इति रामायणम्॥ राजर्षिभेदः। स च अमूर्त्तरयःपुत्त्रः। (यथा, श्रीभागवते। ५। १५। ७।
"गयं नृपः कः प्रति याति कर्म्मभिः॥")
असुरभेदः। इति वायुपुराणम्॥ गयाप्रदेशः। यथा, गोः रामायणे। २। १०७। ११।
"गयेन यजमानेन गयेष्वेव पितॄन् प्रति।"
"गयेषु गयाप्रदेशेषु।" इति तट्टीकायाम्॥)

गया, स्त्री, (गयेन गयनाम्ना लोकप्रसिद्धेनासुरेण पुराणान्तरमतभेदेन तन्नाम्ना राजर्षिणा वा निर्म्मिता।) गयराजर्षिपुरी। इति हेमचन्द्रः। ४। ३९॥ सा तु तीर्थभेदः। तस्य नामकरणं यथा,—
"यज्ञं चक्रे गयो राजा बह्वन्नं बहुदक्षिणम्।
यत्र द्रव्यसमूहानां संख्या कर्त्तुं न शक्यते॥
गयं विष्ण्वादयस्तुष्टा वरं ब्रूहीति चाब्रुवन्।
गयस्तान् प्रार्थयामास अभिशप्तास्तु ये पुरा॥
ब्रह्मणा ते द्विजाः पूता भवन्तु क्रतुपूजिताः।
गयापुरी तु मन्नाम्ना ख्यातु ब्रह्मपुरी तथा॥
एवमस्तु वरं दत्त्वा ततश्चान्तर्दधुः सुराः॥"*॥
तस्योत्पत्तिकारणं यथा,—
"गयासुरोऽसुराणाञ्च महाबलपराक्रमः।
योजनानां सपादञ्च शतं तस्योच्चयः स्मृतः॥
स्थूलः षष्टिर्योजनानां श्रेष्ठोऽसौ वैष्णवः स्मृतः।
कोलाहले गिरिवरे तपस्तेपे सुदारुणम्॥
बहुवर्षसहस्राणि निरुच्छ्वासः स्थिरोऽभवत्।
तत्तपस्तापिता देवाः संक्षोभं परमं गताः॥
ब्रह्मलोकं गता देवाः प्रोचुस्तेऽथ पितामहम्।
गयासुराद्रक्ष देव! ब्रह्मा देवांस्तथाब्रवीत्॥
व्रजामः शङ्करं देवा ब्रह्माद्याश्च गताः शिवम्।
कैलासे चाब्रुवन्नत्वा रक्ष रक्ष महाऽसुरात्॥
ब्रह्माद्यांश्चाब्रवीच्छम्भुर्व्रजामः शरणं हरिम्।
क्षीराब्धौ देवदेवेशः स नः श्रेयो विधास्यति॥
ब्रह्मा महेश्वरो देवा विष्णुं नत्वा प्रतुष्टुवुः।
किमर्थमागता देवा विष्णुनोक्तास्तमब्रुवन्॥
गयासुरभयाद्देव! रक्षास्मानब्रवीद्धरिः।
ब्रह्माद्या यान्तु तं दैत्यञ्चागमिष्याम्यहं ततः॥"*
"ऊचुस्तं वासुदेवाद्याः किमर्थं तप्यते त्वया।
सन्तुष्टाश्चागताः सर्व्वे वरं ब्रूहि गयासुर!॥"
"यदि तुष्टाः स्थ मे देवा ब्रह्मविष्णुमहेश्वराः।
सर्व्वदेवद्विजातिभ्यो यज्ञतीर्थशिलोच्चयात्॥
मन्त्रेभ्यो देवदेवीभ्यो योगिभ्यश्चापि सर्व्वशः।
ज्ञातिभ्योऽतिपवित्रोऽहं पवित्रः स्यां सदा सुराः॥
पवित्रो भव तं देवा दैत्यमुक्ता ययुर्दिवम्।
दृष्ट्वा दैत्यं ततः स्पृष्ट्वा सर्व्वे हरिपुरं ययुः॥
शून्ये लोकत्रये जाते शून्या यमपुरी ह्यभूत्।
यम इन्द्रादिभिः सार्द्धं ब्रह्मलोकं ततोऽगमत्॥
ब्रह्माणमूचिरे देवा गयासुरविलोपिताः।
त्वया दत्तो योऽधिकारस्तं गृहाण पितामह!॥
ब्रह्माब्रवीत्ततो देवा व्रजामो विष्णुमव्ययम्।
ब्रह्मादयोऽब्रुवन् विष्णुं त्वया दत्तवरेऽसुरे॥
तद्दर्शनाद्ययुः स्वर्गं शून्यं लोकत्रयं ह्यभूत्।
देवैरुक्तो वासुदेवो ब्रह्माणं स वचोऽब्रवीत्॥
गत्वासुरं प्रार्थयस्व यज्ञार्थं देहि देहकम्।
विष्णूक्तः ससुरो ब्रह्मा गत्वाऽपश्यन्महासुरम्॥

ब्रह्मोवाच।
पृथिव्यां यानि तीर्थानि दृष्टानि भ्रमता मया।
यज्ञार्थं न तु ते तानि पवित्राणि शरीरतः॥
अतः पवित्रं देहं स्वं यज्ञार्थं देहि मेऽसुर!॥

गयासुर उवाच।
धन्योऽहं देवदेवेश! यद्देहः प्रार्थ्यते त्वया।
त्वयैवोत्पादितो देहः पवित्रश्च त्वया कृतः।
सर्व्वेषामुपकाराय यागोऽवश्यं भवत्विति॥
इत्युक्त्वा सोऽपतद्भूमौ श्वेतकल्पे गयासुरः।
नैरृतीं दिशमाश्रित्य तदा कोलाहले गिरौ॥
शिरः कृत्वोत्तरे दैत्यः पादौ कृत्वा तु दक्षिणे।
ब्रह्मा सम्भृतसम्भारो मानसानृत्विजोऽसृजत्॥
चलितस्तकितो ब्रह्मा धर्म्मराजमभाषत।
यास्ति गृहे तव शिला तामानीयात्र धारय॥
दैत्यस्य शीर्षं शिरसि तां धारय ममाज्ञया।
निश्चलार्थं यमः श्रुत्वा धारयन्मस्तके शिलाम्॥
शिलायां धारितायान्तु सशिलश्चासुरोऽचलत्।
देवानूचेऽथ रुद्रादीन् शिलायां निश्चलाः किल॥
तिष्ठन्तु देवाः सकलास्तथेत्युक्त्वा च ते स्थिताः।
देवाः पादैश्चयित्वा तथापि चलितोऽसुरः॥
ब्रह्माथ व्याकुलो विष्णुं गतः क्षीराब्धिशायिनम्।
अजमूचे हरिः कस्मादागतोऽसि वदस्व तत्॥

ब्रह्मोवाच।
देवदेव! कृते यागे प्रचचाल गयासुरः।
इदानीं निश्चलार्थं हि प्रसादं कुरु माधव॥
ब्रह्मणो वचनं श्रुत्वा ह्याकृष्य स्वशरीरतः।
मूर्त्तिं ददौ निश्चलार्थं ब्रह्मणे भगवान् हरिः॥
आनीय मूर्त्तिं ब्रह्मापि शिलायां समधारयत्।
तथापि चलितं वीक्ष्य पुनर्देवमिहाह्वयत्॥
आगत्य विष्णुः क्षीराब्धेः शिलायां संस्थितो-ऽभवत्।
आद्यया गदया चासौ यस्माद्दैत्यः स्थिरीकृतः॥
स्थित इत्येव हरिणा तस्मादादिगदाधरः॥"*॥
"ऊचे गयासुरो देवान् किमर्थं वञ्चितो ह्यहम्।
यज्ञार्थं ब्रह्मणे दत्तं शरीरममलं मया।
पीडयञ्च यद्यहं देवाः प्रसन्नाः सन्तु सर्व्वदा॥"
"वरं ब्रूहि प्रसन्नाः स्मो देवैरूचे गयासुरः॥"
"यावत् पृथ्वी पर्व्वताश्च यावच्चन्द्रार्कतारकाः।
तावच्छिलायां तिष्ठन्तु ब्रह्मविष्णुमहेश्वराः॥
गदाधरः स्वयं लोकान् पूयात् सर्व्वाघनाशनः।
श्राद्धं सपिण्डकं येषां ब्रह्मलोकं प्रयान्तु ते॥"
"किं बहूक्त्या सुरेशानां युष्माकमपि देवताः।
चेन्न, तिष्ठाम्यहं नापि समयः प्रतिपाल्यताम्॥"
"त्वया यत् प्रार्थितं वीर! तद्भविष्यत्यसंशयम्।
अस्मत्पादानर्च्चयित्वा यास्यन्ति परमां गतिम्।
देवैर्दत्तवरो दैत्यो हर्षितो निश्चलोऽभवत्॥"

अथ गयाशिरआदिपरिमाणम्।
"नागाज्जनार्द्दनाद्ब्रह्मयूपाच्चोत्तरमानसात्।
एतद्गयाशिरः प्रोक्तं फल्गुतीर्थं तदुच्यते॥
पितामहं समासाद्य यावदुत्तरमानसम्।
फल्गुतीर्थन्तु विज्ञेयं देवानामपि दुर्लभम्॥
क्रौञ्चपादात् फल्गुतीर्थं यावत् साक्षाद्गयाशिरः।